वेदाञ्जलि, An International Peer Reviewed Refereed Research Journal
वर्ष-९, अंक-१८, भाग-१, जुलाई-दिसम्बर, 2022 | ISSN : 2349-364X | Impact Factor : 6.240

# द्रव्यलक्षणविचारः

डा. वि.वि.एस्.आर्. लक्ष्मीः*

अन्नंभट्टैः तर्कसङ्ग्रहे पदार्थानां विभागः सप्त इति कृतः। यथा **द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्तपदार्थाः**[1] इति। सप्तसु पदार्थेषु अन्तिमः अभावः। ततः पूर्वभाविनः षट्पदार्थाः भावाः। भावेष्वपि द्रव्यं प्रथमं परिगण्यते। यतः गुणादीनां पञ्चानां आश्रयः द्रव्यमेव। अतः द्रव्यस्य प्राथम्यम्। शोधपत्रेऽस्मिन् द्रव्यसामान्यलक्षणविचारः, द्रव्यत्वजातिसिद्धिश्च प्रतिपादिता।

**द्रव्यत्वजातिमत्त्वं, गुणवत्त्वं वा द्रव्यसामान्यलक्षणम्**[2] **इति मूलवाक्यम्।**

इदं च वाक्यं द्रव्यसामान्यलक्षणप्रतिपादनपरम् इति स्पष्टम्। पूर्वं तर्कसङ्ग्रहे तत्र द्रव्याणि **पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव**[3] इत्यनेन द्रव्यविभागः कृतः। तत्र अयं प्रश्नः - द्रव्यसामान्यलक्षणमनुक्त्वा एव मूले विभागः कृतः। तन्नयुज्यते, यतो हि सामान्यलक्षणाकथने सति सामान्यधर्मप्रकारकज्ञानं न जायते, तन्नजायते चेत् द्रव्याणि कति इति विशेषधर्मप्रकारकजिज्ञसा न जायते, तन्नजायते चेत् विभागः न करणीयः, अत एव उक्तं **सामान्यधर्मप्रकारकज्ञानं विशेषजिज्ञासां प्रति हेतुः**[4] इति। तथा च विभागः अनुचितः इति।

अतः मूले लक्षणाकथनात्मकन्यूनता (अवश्यवक्तव्यस्य लक्षणस्य अकथनम्) वारणार्थं दीपिकायां द्रव्यसामान्यलक्षणं निरूप्यते। द्रव्यत्वजातिमत्त्वम् उत गुणवत्त्वं द्रव्यसामान्यलक्षणम् इति। प्रथमलक्षणसमन्वयस्तु इत्थं - द्रव्यत्वजातिः इत्युक्तौ - द्रव्यत्वम् इत्याकारिका जातिः, एतादृशद्रव्यत्वजातिमान् - नवद्रव्याणि, द्रव्यत्वजातिमत्त्वं नवद्रव्येषु अस्ति इति लक्षणसमन्वयः।

न च कालिकसम्बन्धेन द्रव्यत्वजातिमत्त्वं गुणादावपि अस्तीति अतिव्याप्तिः इति वाच्यम्। समवायसम्बन्धेन द्रव्यत्वजातिमत्त्वम् इति लक्षणस्य वक्तव्यत्वात्। तथा च नोक्तातिव्याप्तिः। तथा हि- कालिकसम्बन्धेन द्रव्यत्वजातिमत्त्वं गुणादावस्ति चेदपि, समवायसम्बन्धेन द्रव्यत्वजातिमान् द्रव्याण्येव, समवायसम्बन्धेन द्रव्यत्वजातिमत्त्वं द्रव्येष्वेव इति लक्षणसमन्वयः।

मूलोक्तद्वितीयद्रव्यलक्षणसमन्वयस्तु इत्थं- गुणवत्त्वं द्रव्यसामान्यलक्षणम्। तथा हि- गुणवत् - द्रव्यम्, गुणवत्त्वं द्रव्येषु इति समन्वयः। एवं लक्षणकथने सति कालिकसम्बन्धेन गुणवान् - जन्यगुणः, कालिकसम्बन्धेन गुणवत्त्वं गुणादिषु वर्तते इति अतिव्याप्तिः। तद्वारणार्थं समवायसम्बन्धेन गुणवत्त्वम् द्रव्यसामान्यलक्षणम् इति वक्तव्यम्। तथा हि- कालिकसम्बन्धेन गुणवत्त्वं गुणादिषु सत्त्वेऽपि, समवायसम्बन्धेन गुणवत्त्वं द्रव्येष्वेव इति समन्वयः।

अत्र कश्चन प्रश्नः जायते- प्रथमलक्षणम् उक्तं, पुनः द्वितीयलक्षणं किमर्थमिति, प्रथमलक्षणे अस्वारस्यम् अस्ति इत्यतः द्वितीयलक्षणम् उक्तम्, तर्हि प्रथमलक्षणे का अनुपपतिरिति चेत् - उच्यते- द्रव्यत्वजातिमत्त्वं द्रव्यसामान्यलक्षणम् इति कथयामः चेत् लक्षणस्य प्रयोजनम् उच्यते- व्यावर्तकत्वम् अर्थात् इतरभेदानुमितिजनकत्वं तदेव न स्यात् इति। यथा गोः सास्नादिमत्त्वं लक्षणम्। तादृशलक्षणस्य प्रयोजनं व्यावर्तकत्वम् अर्थात् इतरभेदानुमितिजनकत्वं, तद्यथा "गौः - स्वेतरभिन्ना - सास्नादिमत्वात्" इति। इदमेव इतरभेदानुमानम् इति वक्तुं शक्यते इति लक्षणस्य यत् प्रयोजनं तत् सास्नादिमत्त्वम् इति लक्षणे सत्त्वात् सास्नादिमत्त्वं गोलक्षणं भवितुमर्हति।

---

*सहायकाचार्या, न्यायवैशेषिकविभागः, कर्णाटकसंस्कृतविश्वविद्यालयः, बेङ्गलूरु

प्रकृते द्रव्यत्वजातिमत्त्वं द्रव्यसामान्यलक्षणं चेत्, तस्य प्रयोजनं इतरभेदानुमितिजनकत्वं, इतरभेदानुमानं तु - "द्रव्यं- स्वेतरभिन्नं - द्रव्यत्वात्" इति। एवं वक्तुं शक्यते चेत् द्रव्यं - स्वेतरभिन्नम् इति अनुमितिजनकत्वं द्रव्यत्वरूपहेतौ अस्तीति लक्षणस्य प्रयोजनं आगतमित्यतः द्रव्यत्वजातिमत्त्वं द्रव्यसामान्यलक्षणम् इति वक्तुं शक्यते। किन्तु द्रव्यं - स्वेतरभिन्नं - द्रव्यत्वात् इति वक्तुमेव न शक्यते। कुतः इति चेदुच्यते- यथा पर्वतो वह्निमान् धूमात् इति परार्थानुमानस्थले मतभेदेन उपनयवाक्यम् उभयथा भवति-

1. व्याप्तिविशिष्टपक्षधर्मता उपनये भासते वह्निव्याप्यधूमवान्पर्वतः इति
2. पक्षधर्मतामात्रं भासते धूमवान् पर्वतः इति।

तथा प्रकृतस्थले द्रव्यत्वजातिमत्त्वं द्रव्यसामान्यलक्षणं चेत्, तस्य प्रयोजनं इतरभेदानुमितिजनकत्वं, इतरभेदानुमानं तु - द्रव्यं- स्वेतरभिन्नं - द्रव्यत्वात् इति। अत्र परार्थानुमाने उपनयवाक्यम् उभयथा भवति- स्वेतरभिन्नत्वव्याप्यद्रव्यत्ववत् द्रव्यम्, एवं द्रव्यत्ववत् द्रव्यम् इति।

अत्र प्रथम उपनयवाक्यात् शाब्दबोधः जायते, द्वितीय उपनयवाक्यात् शाब्दबोधः न जायते, यतो हि उद्देश्यतावच्छेदकविधेययोः ऐक्ये न शाब्दबोधः, उद्देश्यतावच्छेदकविधेययोः भेदे शाब्दबोधः इति। यथा घटत्ववान् घटः इत्यत्र उद्देश्यं घटः, उद्देश्यतावच्छेदकं घटत्वम्, विधेयमपि घटत्वम्, तयोः ऐक्यात् अत्र न शाब्दबोधः। किन्तु नीलघटत्ववान् घटः इत्यनेन शाब्दबोधः जायते, अत्र उद्देश्यतावच्छेदकं घटत्वं, विधेयम् नीलघटत्वं, तयोः ऐक्याभावात् न शाब्दबोधः।

तथा प्रकृते स्वेतरभिन्नत्वव्याप्यद्रव्यत्ववत् द्रव्यम् इति प्रथम उपनयवाक्यात् शाब्दबोधः जायते, तत्र उद्देश्यतावच्छेदकं द्रव्यत्वं, विधेयं स्वेतरभिन्नत्वव्याप्यद्रव्यत्वं, तयोः ऐक्याभावात् शाब्दबोधः। किन्तु द्वितीयोपनयवाक्यात् न शाब्दबोधः, यतो हि तत्र उद्देश्यतावच्छेदकं द्रव्यत्वं, विधेयमपि द्रव्यत्वं तयोः ऐक्यात् न शाब्दबोधः।

तथा च द्रव्यत्वजातिमत्त्वं द्रव्यसामान्यलक्षणम् इत्युच्यते चेत् इतरभेदपरार्थानुमाने, उपनयवाक्यात् पक्षधर्मतामात्रं बोध्यते इति वदतां मते द्रव्यत्ववत्द्रव्यम् इत्युपनयवाक्यात् उद्देश्यतावच्छेदकविधेययोः ऐक्यात् न शाब्दबोधः इत्यनुपपत्तिः। एतादृशानुपपत्तेः सत्वादेव द्वितीयलक्षणम् उक्तं गुणवत्त्वं द्रव्यसामान्यलक्षणम् इति।

एवं लक्षणं कथयामश्चेत् पूर्वोक्तानुपपत्तिः नास्ति। यतो हि लक्षणस्य प्रयोजनम् इतरभेदानुमितिजनकत्वम्, अत्र इतरभेदानुमानं तु द्रव्यं स्वेतरभिन्नं गुणवत्त्वात् इति। अत्र परार्थानुमाने उपनयवाक्यात् पक्षधर्मतामात्रभाने सति गुणवत्त्ववत् द्रव्यम् इति उपनयवाक्यस्याकारः। अत्र उद्देश्यतावच्छेदकं - द्रव्यत्वं, विधेयं - गुणवत्त्ववत्वं, तयोः ऐक्यं नास्ति अतः परार्थानुमाने उपनयवाक्यात् शाब्दबोधः जायते इति नानुपपत्तिः।

ननु गुणवत्त्वमात्रं द्रव्यलक्षणं चेत् आद्यक्षणावच्छिन्नघटे(उत्पतिकालीनघटे), उत्पन्नविनष्टघटे च द्रव्यलक्षणस्य अव्याप्तिः। तथा हि- आद्यक्षणावच्छिन्नघटे कोपि गुणः नास्ति इत्यतः, गुणवान्- आद्यक्षणावच्छिन्नघटः न भवति, गुणवत्त्वम्- आद्यक्षणावच्छिन्नघटे नास्ति, यतो हि- अत्र कश्चन नियमः अस्ति **उत्पन्नं द्रव्यं क्षणम् अगुणं निष्क्रियञ्च तिष्ठति** इति। एतादृशनियमानुसारं आद्यक्षणावच्छिन्नघटे गुणवत्त्वम् इति लक्षणस्यासत्वात् अव्याप्तिः।

एवम् उत्पन्नविनष्टद्रव्ये अव्याप्तिः। कथमिति चेत्, उत्पन्नविनष्टघटः नाम प्रथमक्षणे उत्पन्नः, ततः नष्टश्च। तस्मिन् घटे प्रथमक्षणे गुणवत्त्वमिति लक्षणसमन्वयः कर्तुं न शक्यते, यतः **उत्पन्नं द्रव्यं क्षणम् अगुणं निष्क्रियञ्च तिष्ठति** इति नियमस्य सत्वात्। एवं द्वितीयक्षणे गुणः



Scanned with CamScanner

उत्पद्यते इत्यपि वक्तुं न शक्यते, यतो हि- अत्र उत्पन्नानन्तरमेव अयं घटः नष्टः इति द्वितीयक्षणे घटस्यैव असत्वात् गुणवत्त्वमिति लक्षणमव्याप्तम् इति चेत्, न। **गुणसमानाधिकरणसत्ताभिन्नजातिमत्त्वमिति**[5] **द्रव्यसामान्यलक्षणमिति परिष्क्रियते।** तथा च पूर्वोक्ताव्याप्तिः वार्यते। तथा हि- गुणः - रूपम्। तस्याधिकरणं - पृथिवी। तद्वृत्तिः सत्ताभिन्ना या जातिः - द्रव्यत्वजातिः, तादृशद्रव्यत्वजातिमान् - आद्यक्षणावच्छिन्नघटः, तादृशद्रव्यत्वजातिमत्त्वं आद्यक्षणावच्छिन्नघटे सत्वान्नाव्याप्तिः।

नन्वेवं लक्षणपरिष्कारेऽपि, "एकं रूपं" "रूपं रसात्पृथक्" इति प्रतीतिबलात् एकत्वाधिकरणं स्वाश्रयसमवायसम्बन्धेन रूपम्, एवं स्वाश्रयसमवायेन पृथक्त्वाधिकरणं रूपम्। तथा हि- स्वं - एकत्वं, पृथक्त्वं च, स्वाश्रयः घटः, तत्र समवायेनसम्बद्धः रूपम्। तथा च स्वाश्रयसमवायेन एकत्वपृथक्त्वात्मकगुणाधिकरणं - रूपम्। तद्वृत्तिसत्ताभिन्ना जातिः - गुणत्वजातिः, तादृशजातिमत्त्वं गुणे अस्तीत्यतिव्याप्तिरिति चेत्, न।

जातिघटितलक्षणे समवायसम्बन्धावच्छिन्नत्वस्य निवेशान्न पूर्वोक्तदोषः। तथा च लक्षणम् - **समवायसम्बन्धेन गुणसमानाधिकरणसत्ताभिन्नजातिमत्त्वमिति द्रव्यसामान्यलक्षणमिति।** तथा हि- समवायसम्बन्धेन गुणाधिकरणं रूपं भवितुं नार्हति, समवायेन गुणे गुणानङ्गीकारात्। अपि तु द्रव्यमेव। तद्वृत्तिः सत्ताभिन्ना या जातिः - द्रव्यत्वजातिरेवेति नातिव्याप्तिः।

**गुणसमानाधिकरणसत्ताभिन्नजातिमत्त्वं** द्रव्यसामान्यलक्षणम्। इदं च लक्षणं जातिघटितलक्षणम्। अत्र द्रव्यत्वजातौ किं प्रमाणम्, द्रव्यत्वजातिर्सिद्ध्यति चेदेव इदं लक्षणं युज्यते न त्वन्यथा। द्रव्यत्वजातौ प्रमाणं प्रदर्शयन्ति न्यायसिद्धान्तमुक्तावल्यां इत्थम् - **कार्यसमवायिकारणतावच्छेदकतया, संयोगस्य, विभागस्य वा समवायिकारणतावच्छेदकतया द्रव्यत्वजातिसिद्धेरिति**[6]।। इति।

**अस्यायमाशयः** - कार्यसमवायिकारणतावच्छेदकतया द्रव्यत्वजातिः सिद्ध्यति। तथा हि- कार्यम् - पृथिव्यप्तेजोवायुद्व्यणुकादिकम्, जन्यगुणाः, जन्यकर्माणि। एतादृशकार्यं समवायसम्बन्धेन द्रव्येषु उत्पद्यते। द्रव्यं च कार्यं प्रति तादात्म्यसम्बन्धेन कारणं भवति। समवायसम्बन्धेन कार्यं प्रति तादात्म्यसम्बन्धेन यत् कारणं तत् समवायिकारणम्। तथा च गुणे गुणोत्पत्तिवारणाय समवायसम्बन्धेन कार्यं प्रति तादात्म्यसम्बन्धेन द्रव्यं कारणमिति वक्तव्यम्। तथा च समवायसम्बन्धावच्छिन्नकार्यत्वावच्छिन्नकार्यतानिरूपिततादात्म्य-सम्बन्धावच्छिन्नद्रव्यनिष्ठा कारणता इति कार्यकारणभावः लभ्यते। तथा च कार्यं प्रति द्रव्यं समवायिकारणम्। एतादृशकार्यसमवायिकारणतावच्छेदकतया द्रव्यत्वजातिः सिद्ध्यति। तथा चानुमानम् - समवायसम्बन्धावच्छिन्नकार्यत्वावच्छिन्नकार्यतानिरूपिततादात्म्यसम्बन्धा-वच्छिन्नद्रव्यनिष्ठा कारणता - किञ्चिद्धर्मावच्छिन्ना - कारणतात्वात् - घटनिरूपितकपालनिष्ठकारणतात्वात् इति। यथा दृष्टान्ते घटनिरूपितकपालनिष्ठकारणतायां कारणतात्वं वर्तते। किञ्चिद्धर्मावच्छिन्नत्वं च वर्तते, या या कारणता सा सा किञ्चिद्धर्मावच्छिन्ना, निरवच्छिन्नकारणतायाः असम्भवात्। तद्वत् पक्षे कारणतात्वं वर्तते, एवं निरवच्छिन्नकारणतायाः असम्भवात् द्रव्यनिष्ठकारणतायां किञ्चिद्धर्मावच्छिन्नत्वं सिद्ध्यति। स एव किञ्चिद्धर्मः द्रव्यत्वजातिरूप इत्यनेनानुमानेन द्रव्यत्वजातिः सिद्ध्यति।

ननु समवायेन नीलं प्रति स्वाश्रयसमवेतद्रव्यत्वसम्बन्धेन नीलस्य कारणतास्वीकारेण गुणे गुणोत्पत्तिवारणसंभवात् समवायेन कार्यं प्रति तादात्म्येन द्रव्यस्य कारणत्वे मानाभावः, तथा च नोक्तरीत्या द्रव्यत्वजातिसिद्धिः स्यादिति प्रकारान्तरेण द्रव्यत्वजातिसिद्धिरुच्यते - **संयोगस्य**



Scanned with CamScanner

**समवायिकारणतावच्छेदकतया** इति। तथा चानुमानाकारः - समवायसम्बन्धावच्छिन्नसंयोगत्वावच्छिन्नसंयोगनिष्ठकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्न-द्रव्यनिष्ठा कारणता - किञ्चिद्धर्मावच्छिन्ना - कारणतात्वात् - घटनिरूपितकपालनिष्ठकारणतात्वात् इति। अत्र यः किञ्चिद्धर्मः स एव द्रव्यत्वजातिरूप इत्यनेनानुमानेन द्रव्यत्वजातिः सिद्ध्यति।

ननु केचन नित्यसंयोगमङ्गीकुर्वन्ति, तेषां मते संयोगत्वस्य कार्यतावच्छेदकत्वं न सम्भवतीति अनेनानुमानेन द्रव्यत्वजातिः कथं सिद्ध्यति इत्यतः आह- **विभागस्य समवायिकारणतावच्छेदकतया इति।** नित्यसंयोगः अङ्गीक्रियते चेत् तत्रावश्यं नित्यविभागः न सम्भवति। तथा चानुमानप्रकारः - समवायसम्बन्धावच्छिन्नविभागत्वावच्छिन्नविभागनिष्ठकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्न-द्रव्यनिष्ठा कारणता - किञ्चिद्धर्मावच्छिन्ना - कारणतात्वात् - घटनिरूपितकपालनिष्ठकारणतात्वात् इति। अत्र यः किञ्चिद्धर्मः स एव द्रव्यत्वजातिरूप इत्यनेनानुमानेन अवश्यं द्रव्यत्वजातिः सिद्ध्यति।

एतादृशरीत्या द्रव्यत्वजातिसिद्धौ, तद्घटितद्रव्यसामान्यलक्षणं यत् **समवायसम्बन्धेन गुणसमानाधिकरणसत्ताभिन्नजातिमत्त्वम्** इति लक्षणमपि युज्यते एव।

**परिशीलितग्रन्थसूची**

1. **तर्कसङ्ग्रहः** - अन्नम्भट्टः, न्यायबोधिनी-पदकृत्य-दीपिका-किरणावली व्याख्योपेतः।
2. **न्यायसिद्धान्तमुक्तावली** - श्री विश्वनाथपञ्चाननः, किरणावलीसमन्विता।
3. **सव्यभिचारसामान्यनिरुक्तिः** - गादाधरीसहितः।

**सन्दर्भ :**

1. त.सं pg.no. 6
2. त.सं.दी. pg.no. 11
3. त.सं pg.no. 8
4. स.व्य.सा. pg.no. 2
5. त.सं.दी. pg.no.14
6. न्या.सि.मु. pg.no. 35

Scanned with CamScanner